Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
OPEN ACCESS
ISSN : 2582-0095
doi : https://doi.org/10.32628/GISRRJ

# महर्षिपाणिनेः सामान्यपरिचयः

डॉ० नन्दिता मिश्रा
सहायक आचार्य (संस्कृत) जवाहर लाल नेहरू स्मारक पी०जी० कालेज, महराजगंज,उत्तर प्रदेश।

**Article Info**
**Article History**
Accepted : 20 Sep 2024
Published : 05 Oct 2024
**Publication Issue :**
Volume 7, Issue 5
September-October-2024
**Page Number :** 66-77

**शोधसारांशः—** गवेषकैण्टाध्याय्यां भारतीयेतिहासस्य भूगोलस्य, लोकन्याययस्य, राजनीतेश्च सत्ता व्यापकरूपेण अन्विष्टा। यथा डॉ० वासुदेवशरणअग्रवालमहोदयेन ''पाणिनिकालीन भारतवर्ष'' मञ्जके सोपज्ञे ग्रन्थे पाणिनीकालीनमितिहासादिकमष्टाध्याय्या एव प्रमाणीकृतवान्।

**मुख्यशब्दः—**महर्षिपाणिनि, लोकन्याय, अष्टाध्यायी, व्याकरणम्, सूत्रम्।

**महर्षिपाणिनिः** — अग्मिन् जगति सृष्टेरारभ्याद्यावधि समुपलब्धानां व्याकरणाशास्त्राणां पठनपाठनक्रमस्य सुव्यवस्था वैज्ञानिकप्रकारश्च यथा पाणिनीये व्याकरणशास्त्रे दृष्टिगोपथं आयाति न तथान्यव्याकरणेषु। विविधव्याकरणशास्त्रकर्तृमहर्षिमणिमालायां मध्यमः सुमेरुरिव महर्षिः प्राणिनिर्विराजते। यदीयस्य सर्वाङ्गपूर्णव्याकरणस्य प्रशंसा भारतीया वैदेशिकाश्च सततं कुर्वन्ति। सत्यु शब्दसाधुत्वप्रक्रियानिर्वाहकेषु एतदतिरिक्तेषु प्रायः शतार्धव्याकरणान्तरेषु लक्ष्यलक्षणात्मकं पाणिनीय व्याकरणमेव सम्प्रति सर्वाङ्गपूर्ण महतः शब्दपारावारस्य साधुत्वाधिगमे सामर्थ्यशालिरस्ति। षड्विधसूत्रोपदेशेन महर्षिः पाणिनिः स्वीयां व्याकरणशाखवेदितां सम्यक् सुस्थिरीचकार। एवंविधवैशिष्ट्यान्वितस्य शब्दशाम्यविधातुरिति—वृत्तविषयिणी जिज्ञासा स्वभावतः समुदेत्येवेति।

आचार्यपुरुषोत्तमदेवविरचिते 'त्रिकाण्डशेष' इत्याख्ये कोषग्रन्थे आचार्यपाणिने षण्णां नाम्नामुल्लेखो विद्यते। यथापाणिनिस्त्वाहिको दाक्षीपुत्रः शालङ्किपाणिनौ।

शालातुरीय ......................।। इति ।।

तत्रकारान्तः पाणिनिशब्दोऽकारान्तः पाणिनशब्दश्च। अतः परं यशस्तिलकाख्ये चम्पूकाव्ये "पणिपुत्र" इति नामापि दृ श्यते।

**Copyright © 2024 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License** (CC BY-NC 4.0)

यथा–
"पणिपुत्र इव पदप्रयोगेषु" इति ।।

पूर्व तावत् पाणिनिशब्दस्य प्रकृत्तिप्रत्ययप्रदर्शनम् –पणनं पाणः "पणा व्यहारे स्तुतौ च" इत्यस्माद्धातोः पचाद्यचि। पण अस्यास्तीति पणी। "अत इनिठनौ" इति इनिः। पणिनोऽपत्यं पाणिनः। "शिवादिभ्योऽण्" इति अण्प्रत्ययः। पाणिनस्य गोत्रापत्यं युवा पाणिनिः। "अत इञ्" इति इत्रि पाणिनिशब्दसिद्धिः। लिखितश्च महाभाष्यस्य प्रदीपाख्यटीकाकारेण कैयटेन "वृद्धिर्यस्याचामादिस्तवृद्धम्" इति सूत्रे–"पाणिनोऽपत्यामित्यण्। गाथिविधीति प्रकृत्तिभावाट्टिलोपाभावः। पाणिनस्यापत्यं युवेतीञ्" ।। इति ।। तथा च–
"पाणिनो गोत्रापत्यं पाणिनः, तस्यापत्यं पाणिनिः" इति बालमनोरमाकारः। विध्यन्तरमाह–
"पाणिन्, इति नकारान्तस्य पर्यायवाची अकारान्तः पणिनशब्दः, तस्माद् "अत इञ्" इति इञि, पाणिनिशब्दसिद्धिः। पणिनः कश्चिन्मुनिः। तस्यापत्यं पाणिनिरित्यपि। यशस्तिलकाख्ये चम्पूकाव्ये पाणिनिविषये प्रयुक्तस्य पणिपुत्रशब्दस्य तु इन्नन्तस्य पणिन् शब्दस्य पुत्रशब्देन सह समासः, पणिनः पुत्रः पणिपुत्र ।। इति ।। "पणिन् इति नकारान्तादपि" "बह्वादिभ्यश्च" इत्याकृत्तिगणं मत्वा इञ् संभवति। ततोऽपि पाणिनिरिति सिद्धयति।
महर्षिपाणिनेः कालः (विक्रमाब्दतः 2100 पूर्वः)
भगवता पाणिनिना स्वयं क्वापि समयः परिचयो वा नोल्लिखितः। पाणिनेः समयः खलु पाश्चात्यविपिश्चिद्भिरेतद्देशीयेतिहासपरम्परायाः वारतविकतां प्रति अश्रद्दधानैः पौररम्यशिक्षायां सूक्ष्मेक्षिकां प्रयुज्यमानैश्च भारतीयैर्विविधः कालो निर्धारितः, परन्तु न सः सर्वतः प्रमाणकोटिं प्राप्नोति। पाणिनेः कालनिर्धारणसम्बन्धीनि भारतीयानां पाश्चात्यानां च विदुषां मतानि यथा सन्ति–

| | |
|---|---|
| १. बेवरः | ३०० ई० पूर्वम्। |
| २. कीथः | ३०० ई० पूर्वम्। |
| ३. मैक्समूलरः | ३५० ई० पूर्वम्। |
| ४. मैकडोनलः | ५०० ई० पूर्वम्। |
| ५. वासुदेव शरणः | ५०० ई० पूर्वम्। |
| ६. गोल्डस्टुकरः | ७०० ई० पूर्वम्। |
| ७. बेलबेकरः | ७०० ई० पूर्वम्। |
| ८. भाण्डारकरकः | ७०० ई० पूर्वम्। |
| ९. सत्यव्रतः सामश्रमी | २४०० ई० पूर्वम्। |
| १० श्री युधिष्ठिरो मीमांसकः | २९०० वि०सं० पूर्वम्। |

एतेषु **"संस्कृत व्याकरण शास्त्र का इतिहास"** इत्याख्ये रवक्ते ग्रन्थे "श्रीमान् युधिष्ठरो मीमांसकः" अन्त साक्ष्यभूतैर्वहुभिः प्रमाणैः सूक्ष्मतया पाणिनेः समयो विक्रमादित्यकालात् २९०० वर्ष पूर्व इति निश्चिनोति। एतदेव मतं प्रामाणिकं सिद्धयति।

**महर्षिपाणिनेर्जन्मभूमिः**

आचार्यपुरुषोत्तमदेवक्ते त्रिकाण्डशेषाख्ये कोषग्रन्थे महर्षिपाणिनेः षट्सु नामसु शालातुरीय, इति नामापि उट्टकितम्। शलातुरनामको ग्रामः। सोऽभिजनोऽस्यास्तीति। अभिजनो नाम स्वपूर्वजानां जनिभूः कर्मभृश्न। लिखितञ्च भाष्यकारेण–

**"अभिजनो नाम यत्र पूर्वैरुषितम्, निवासो नाम यत्र संप्रत्युष्यते"७** इति। महाभाष्यम्।

"तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्कः""इति सूत्रेणानेन शलातुर इति शब्दादभिजनेऽर्थे छण्प्रत्ययो विधीयते। **"शालातुरीय"** इति रूपं निष्पन्नम्।

जैनलेखकः श्रीमान् वर्धमानः शालात्रीयशब्दस्य व्युत्पत्तिमित्थं दर्शयति–

**"शलातुरो नाम ग्रामः सोऽभिजनोऽस्यास्तीति शालातुरीयः तत्र भवान् पाणिनि"** इति। अनेन ज्ञायते भगवान् पाणिनिरन्यत्र क्वचिन्निवसति रम, शलातुराख्यो मामोऽभिजन एवेति। **वाहीकग्रामेभ्यश्च"** इत्यादिभिः सूत्रैस्तथा तत्तद्भाण्यानुसारेण च प्रतीयते यत् पाणिनिर्वाहिकदेशस्य तत्समीपवर्तिनो वा देशस्य निवासी आसीदिति।

पाणिनेरभिजनः शतातुराख्यो ग्रामः, शलातुरात् शलाथुरः, शलाथुराद् हलाथुरः, हलाधुगद् लाश्ररः, लाधुराद् लाहूरः लाहूराद् लाहौर इति अप्रभ्रंशतां गच्छन् वर्तमाने लाहौरनाम्ना पाकिस्तानदेशे विद्यमानं नगरम्।

**महर्षिपाणिनेर्नामानि** – आचार्यपुरुषोत्तमदेवानुसारं पाणिनेः षण्नामानि तानि च नामानि अधो निर्दिश्यन्ते–

१ पाणिनिः २. आहकः ३ दाक्षीपुत्रः ४. शालाङ्कि ५. पाणिनः ६. शालातुरीयः।

**महर्षिपाणिनेर्वंशः** – महामहोपाध्याय पण्डितः शिवदत्तशर्मा पाणिनेः शालङ्किरिति नाम पितृव्यपदेशजं मनुते। तदनुसारं पाणिनेः पितुर्नाम शलङ्क इति। त्रिकाण्डशेषाख्यकोषानुसारं मतमेतद् युक्तियुक्तत्वं भजते। अन्यथा शालङ्किरिति पाणिनेर्नामाप्रामाणिक स्यात्। यतो हि कुत्राप्यन्त्र (त्रिकाण्डशेषकोषं विहाय) एतन्नाम विषये कैरपि पण्डितैः स्वलेखनी नैव सञ्चालिता दृश्यते। मातुर्नामविषयते तु तत्र भवान् पतञ्जलिरेव सर्वप्रथमं प्रमाणम्। तद्यथा–

**"सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिने"** इति।

इत्यनेन सिद्धयति भगवतः पाणिनेर्मातुरभिधेयं दाक्षीत। इयं खलु दक्षकुलसम्भवा। गोत्रप्रत्ययान्तोऽयं दाक्षीशब्दः। दक्षस्य गोत्रापत्यं दाक्षी। दक्षो नाम पुराणादौ प्रसिद्धः प्रजापतिः।

**महर्षिपाणिनेर्गुरुः** – महर्षिपाणिनिः स्वकीये ग्रन्थे क्वापि स्वस्य गुरोर्नामादिकं नैव निर्दिष्टवान्। विषयेऽस्मिन् कथासरित्यागरं पद्यमिदं प्रस्तौति–

**अथ कालेन वर्षस्य शिष्यवर्गो महानभूत्।**
**तत्रैकः पाणिनिर्नाम जडबुद्धितरोऽभवत्" ।।**

श्री महामाहेश्वरजयद्रथविरचिते हरचरितचिन्तामणौ शब्दशास्त्रावताराख्ये सप्तविंशे प्रकाशेऽपि एवमेव। यथा–

**"अपूर्व ध्वनिमाकर्ण्य दिव्यं सञ्जातविस्मयाः।**
**उपासते स्म सर्वेऽपि पौरा वर्षगुरुं ततः ।। ७०**
**।। स्कन्दप्रसादं तं ज्ञात्वा तद्देशनृपतिस्ततः ।**
**हर्षेण वर्षोपाध्यायमुपास्ते स्म सविस्मयः ।।७१ ।।**

**अथ कालेन बहवः शिष्या वर्षमुपायतुः ।**

**एकोऽपि पाणिनिर्नाम जडबुद्धिरुपाययौ ।।७२।।**

अत्र केचिदाचार्याः पाणिनेर्गुरु वर्षत्वेन नैवोररीकुर्वन्ति।

महर्षिपाणिनेः शिष्यविषये महाभाष्यकारः पतञ्जलिः पाणिनीयेषु शिष्यसमुदायेषु कमपि कौत्सं शिष्यत्वेन मनुते। मह्यथा–

**"उपसेदिवान् कौत्सः पाणिनिम्" इति।**

**"भाषायां सद–वस–श्रुवः"** इति सूत्रे काशिकावृत्तौ उदहरणद्वयम्–

(१) अनूषिवान् कौत्सः पाणिनिम।

(२) उपशुश्रूषिवान् कौत्सः पाणिनिम। इति

उपर्युक्तेनोदाहरणद्द्वयेन कश्चित् कौत्साख्यो नरः पाणिनेः शिष्यरुपेणासीदिति सहजमनुमातुं शक्यते।

अतः परमनेके शिष्याः पाणिनेरासनिति महाभाष्येण जायते। यथा–

**"उभयथा ह्याचार्येण शिष्याः सूत्रं प्रतिपादिताः, केचिदाकडारादेका संज्ञा इति केचित् प्राक्कडारात्परं कार्यमिति"।**

एकस्य द्विविधं पाठकदृष्ट्वानुमीयते यत् केभ्यश्चिच्छिष्येभ्यः पाणिनिः "आकडारादेका संज्ञा" इत्युपदिष्टवान्, केभ्यश्चिच्छिष्येभ्यः प्राक्कडारादिति। अत एवास्य बहुशिष्यत्वं सिद्धयति। पाणिनिः स्वकीयशब्दानुशासनस्य बहुवारं प्रवचनं कृतवानिति काशिकया पाणिनिशिष्याणां द्विधा विभक्तेन ज्ञायते। तद्यथा–

(१) पूर्वपाणिनीयाः (२) अपरपाणिनीयाः"इति।

मन्वेऽत्र कालकृतभेद एवं आधारितः।

महर्षिपाणिनेः प्राथमिकशिक्षाविषये न क्वापि प्रमाणानि दृष्टिगोचरतामायान्ति तथापि पाणिनीः पूर्व महान् जडमतिरासीदिति केचिद् विद्वांसः प्रमाणयन्ति। तद्यथा कथासरित्सागरे।

**"तन्नैकः पाणिनिर्नाम जडबुद्धितरोऽभवत्"** इति।

महामाहेश्वरजयद्रथविरचिते हरचरितचिन्तामणौ शब्दशास्त्रावताराख्ये सप्तविंशे प्रकाशे यथा–

**एकोऽपि पाणिनिर्नाम जडबुद्धिरुपाययौ।**

**शिष्यान्तरोपहासेन सावमानः स पाणिनिः ।।** इति।

स्वगुरोर्वर्षस्याश्रमेऽसौ पाणिनिः सतीर्थेषु महान् जडमनिरासीत् ।

**पाणिनेर्मृत्युः**

पाणिन्यादीनां मृत्युविषयक पद्यमिदं पञ्चतन्त्राख्ये ग्रन्थे प्राचीनग्रन्थादुदधृतमस्ति तद्यथा ।

**"सिंहो व्याकरणस्य कर्तुरहरत् प्राणान् प्रियान् पाणिनेः**

**मीमांसाकृतमुन्ममाथ सहसा हस्ती मुनिं जैमिनिम्।**

**छन्दोज्ञाननिधिं जघान मकरो वेलातटे पिङ्गलम्**

**अज्ञानावृतचेतसामतिरुषां कोऽर्थस्तिरश्चं गुणैः ।।"**

इति पद्येनानेन ज्ञायते यत् पाणिनेर्मृत्युहेतुः सिंहः। पाणिनीये व्याकरणसम्प्रदाये विश्रुतेयं किंवदन्त्यपि प्रामाण्यमर्हति। तत एव मन्ये व्याकरणस्यानध्यायरूपेण प्रतित्रयोदशी वरीवर्ति। कस्य पक्षस्य त्रयोदश्यामनध्याय इति नैव क्वापि प्रमाणं सम्प्राप्यते। तद्विषयकग्रन्धस्य शास्त्रस्य वा प्रणेतुः पञ्चत्वप्राप्तिदिने तद्विषस्यानध्यायः सर्वत्र दरीदृश्यते। यथा–द्वादशी पुराणानां वेदानाञ्चनध्यायः, यस्यां वेदव्यासस्य भुवो विरहणमित्यादि।

**पणिनेर्महत्त्वम्** – महर्षि पाणिनिरद्वितीयो विद्वानासीदित्यत्र न क्वापि सन्देहावसरः। भारतीयाः प्राचीनाः आधुनिकाः पाश्चात्याश्च विपश्चितः पाणिनि मुक्तकण्ठं प्रशंसन्ति। भारतीयाः सर्वविधा अपि विद्वांसः पाणिनीयव्याकरणस्य पाणिनेश्च अधमर्णाः सन्ति।

पाणिनीयशब्दानुशासनस्य सूक्ष्मपर्यवेक्षणेन ज्ञायते यत् पाणिनिनं केवलं व्याकरणशास्त्रस्य परिज्ञातासीदपित् सर्वविधवाडमय तरयाप्रतिहतगतिरासीदिति । वैदिकवाङ्मयादतिरिक्तं भूगोलेतिहासादिलोकव्यवहारस्यापि अद्वितीयो विद्वानासीत्। तत्र भवतः शब्दानुशासनमेव प्राचीन भूगोलेतिहासज्ञानायैको महान् प्रकाशस्तम्भः। महाभाष्यकारो भगवान् पतञ्जलिरष्टाध्याय्याः **"वद्धिरादैवच्"** इति सूत्रस्य व्याख्यानावसरेऽनर्थकत्वनिराकरणेन समाधानात्मक भाष्येण कथयति– "प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुखे महता प्रयत्ने सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम, किं पुनरियता सूत्रेण" इति। अन्यच्च "इको यणचि" इति सूत्रे भाष्ये लिखति–

**"सामर्थ्ययोगान्नहि किञ्चिदस्मिन् पश्यामि शास्त्रे यदनर्थकं स्यात्"** इति। अत्र पाणिनीव्याकरणे सूत्राणा परस्परसम्वन्धिसामर्थ्यमवलोक्य किमप्यनर्थकं दृग्गोचरतां नैव यातीति पतञ्जलेराशयः। अलौकिकधीसम्पन्नो भगवान् पतञ्जलिः पाणिनीयशाखस्योत्कृष्टं महत्त्वं दर्शयति सर्वत्र।

व्याख्यान **"उदक् च विपाशः"** इति सूत्रप्रसङ्गे पतञ्जलिः साश्चर्य निर्दिशति यत्–**"महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्य"**इति।

ऋग्वेदस्य भाष्यकाररो वेइङ्कटमाधवः पाणिनिमधिकृत्येदमुट्टङ्कयति "शाकल्यः पाणिनिर्यास्क इत्यूगर्थपरास्त्रय" इति। अस्यायमाशयः ऋग्वेदस्य सम्यग्ज्ञातारस्त्रय एव, तेष्वन्यतमः पाणिनिरस्ति। अत एव स्वकीयायामष्टाध्याय्यां स्वरविशेषपरिज्ञानार्थ प्रायः ४०० सुत्राणामुल्लेखः कृतः पाणिनिना।

अनेनेदं ग्रपष्टं भवति यद् भगवति पाणिनौ वेदज्ञता निःसन्देहं परिवृद्धासीदिति । गवेषकैण्टाध्याय्यां भारतीयेतिहासस्य भूगोलस्य, लोकन्याययस्य, राजनीतेश्च सत्ता व्यापकरूपेण अन्विष्टा। यथा डॉ० वासुदेवशरणअग्रवालमहोदयेन ''पाणिनिकालीन भारतवर्ष" मञ्जके सोपज्ञे ग्रन्थे पाणिनीकालीनमितिहासादिकमष्टाध्याय्या एव प्रमाणीकृतवान्।

सन्दर्भसूची

१. अष्टाध्यायी ५/२/११५ पा०सू०।

२. अष्टाध्यायी ४/१/११२ पा०सू०।

३. अष्टाध्यायी ४/१/६५ पा०सू०।

४. अष्टाध्यायी १/१/७३ पा०यू०।

५. अष्टाध्यायी ४/१/६५ पा०सू०।

६. अष्टाध्यायी ४/१/६६ पा०सू०।

७. महाभाष्यम् ४/३/६० पा०सू०।

८. अष्टाध्यायी ४/३/६४ पा०सु०।

६. अष्टाध्यायी ५/२/११७ पा०सू०।

१०. महाभाष्यम् १/१/२० पा०सू०।

११. कथासरित्सागरम् १/३/२० पा०सू०।

१२.ह०च० श०अ० २७ प्रा०।

१३. महाभाष्यम् ३/२/१०८ पा०सू०।

१४. काशिकावत्ति ३/२/१०८ पा०यू०।

१५. महाभाष्यम् १/४/१ पा०सू०।

१६. रघुवंशमहाकाव्यम् ५/१ पा०सू०।

१७. पा०सु०१/१/१।

१८. पा०सू० ६/१/७७।

१६. पा०सु० ४/२/७४।